॥ श्री गरुड कवचम् ॥
Shri Garur Kavach

॥ ॐ गण गणपतये नमः ॥

अस्य श्रीगरुडकवचस्तोत्रमन्त्रस्य नारद भगवान् ऋषिः
वैनतेयो देवता अनुष्टुप्छन्दः श्रीवैनतेयप्रीत्यर्थे जपे विनियोगः ।

ॐ शिरो मे गरुडः पातु ललाटे विनितासुतः ।
नेत्रे तु सर्पहा पातु कर्णौ पातु सुराहतः ॥ १ ॥
नासिकां पातु सर्पारिः वदनं विष्णुवाहनः ।
सूर्यतालू च कण्ठे च भुजौ पातु महाबलः ॥ २ ॥

हस्तौ खगेश्वरः पातु कराग्रे तरुणाकृतिः ॥ ३ ॥
स्तनौ मे विहगः पातु हृदयं पातु सर्पहा ।
नाभिं पातु महातेजाः कटिं मे पातु वायुनः ॥ ४ ॥

ऊरू मे पातु उरगारिः गुल्फौ विष्णुरथः सदा ।
पादौ मे तक्षकः सिद्धः पातु पादाङ्गुलींस्तथा ॥ ५ ॥
रोमकूपानि मे वीरो त्वचं पातु भयापहा ।
इत्येवं कवचं दिव्यं पापघ्नं सर्वकामदम् ॥ ६ ॥

यः पठेत्प्रातरुत्थाय विषदोषं न पश्यति ।
त्रिसन्ध्यं पठते नित्यं बन्धनात् मुच्यते नरः ।
द्वादशाहं पठेद्यस्तु मुच्यते सर्वकिल्विषैः ॥ ७ ॥

॥ इति श्री गरुड कवचं सम्पूर्णम् ॥